INDIAN INSTITUTE OF MANAGEMENT & COMMERCE
DEGREE & P.G COLLEGE, An Autonomous College
Sponsored by VASAVI FOUNDATION & Affiliated to OSMANIA UNIVERSITY
RE-ACCREDITED BY NAAC WITH "A+" GRADE
An ISO 21001 : 2018 Certified College
6-1-91, Adj. to Telephone Bhavan, Khairatabad, Hyderabad-500 004 Telangana, INDIA
E-mail Id: iimc1973@gmail.com / info@iimchyd.ac.in, Website: www.iimchyderabad.com / www.iimchyd.ac.in
Phones : 2323 7902, 2323 1542 Mobile : 95531 62767

**Department of Sanskrit**

**PATTERN OF QUESTION PAPER FOR SANSKRIT SECOND LANGUAGE, I SEMESTER**

Pert A: 5 to be answered from given 8 small answer type questions 5*4 =20

Part B: 9,10,11,12,13 Long answer type questions with Internal choice 5X10 = 50

Exam: 70

Internal Assessment: 30

Total:100

PART-A 5x4=20

Answer any five questions. All questions carry equal marks.

1. Translation/Anuvadah of one shloka. (One shloka should be given here from 26" shioka to 36 " shloka of Mudabhishektum varada tvam arhasi.
   - दिव्यैर्गुणैः शक्रसमो रामः सत्यपराक्रमः । इक्ष्वाकुभ्यो हि सर्वेभ्योऽप्यतिरिक्तो विशांपते ।।
   - रामः सत्पुरुषो लोके सत्यधर्मपरायणः । धर्मज्ञः सत्यसंधश्च शीलवाननसूयकः
   - प्रियवादी च भूतानां सत्यवादी च राघवः । बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।।
   - तेनास्येहातुला कीर्तिर्यशस्तेजश्च वर्धते । देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः ।।
   - यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा । गत्वा सौमित्रिसहितो नाविजित्य निवर्तते ।।
   - संग्रामात् पुनरागम्य कुञ्जरेण रथेन वा । पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति ।।
   - पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च । निखिलेनानुपूर्व्या च पिता पुत्रानिवौरसान्
   - व्यसनेषु मनुष्याणां भृशं भवति दुःखितः । उत्सवेषु च सर्वेषु पितेव परितुष्यति ।।
   - बलमारोग्यमायुश्च रामस्य विदितात्मनः । आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा ।।
   - अभ्यन्तरश्च बाह्यश्च पौरजानपदो जनः । स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः ।।
   - सर्वान् देवान् नमस्यन्ति रामस्यार्थे यशस्विनः । तेषामायाचितं देव त्वत्प्रसादात् समृध्यताम् ।

2. Annotation/sandarbhavakya (only one). (One sandarbhavakya should be given here from Dharmabaddho dauvarikah)
   - क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः ?
   - क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि ।

- तदधुनैव परिष्कृतं पारदभस्म तुभ्यं दद्याम्
- हंहो ! कपटसंन्सासिन् ! कथं विश्वासघाती स्वामिवञ्चनं च शिक्षयसि?
- दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः ।
- निर्भीकिण हारिणा च मुखमण्डलेन पर्यचिनोत्
- क्षम्यतामनुचितव्यवहार एतस्य ग्राम्यवराकस्य

3. Writing of a sholka/shiokapuranam. (The beginning and ending word of a shloka should be given here from first  EIGHT shlokas of Esha dharma sanatanah)
    - उद्यमेन हि सिद्ध्यन्ति कार्याणि न   मनोरथैः । नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।
    - अमन्त्रम् अक्षरं नास्ति नास्ति मूलम् अनौषधम् । अयोग्यः पुरुषो नास्ति योजकः तत्र दुर्लभः ।।
    - गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा । अथवा विद्यया विद्या चतुर्थी नोपलम्यते ।।
    - तत्र मित्र न वस्तव्यम् यत्र नास्ति चतुष्टयम् । ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ।।
    - मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् । मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् ।।
    - योजनानां सहस्रं तु शनैः गच्छेत् पिपीलिका । अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।
    - काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।
    - शकटं पञ्चहस्तेषु दशहस्तेषु वाजिनम् । गजं हस्तसहस्त्रेषु दुष्टं दूरेण ।।

4. Annotation/sandarbhavakya (only one). (One sandarbhavakya should be given here from Mudabhishektum varada tvamarhasi)
    - श्रेयसा योक्तुकामोऽस्मि सुखार्हमखिलं जगत्
    - जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये ।
    - वृष्टिमन्तं महामेधं नर्दन्तमिव बर्हिणः ।
    - दिव्यैर्गुणैः शक्रसमो रामः सत्यपराक्रमः ।
    - पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति ।
    - वत्सः श्रेयसि जातस्ते दिष्ट्यासौ तव राघवः
    - सर्वस्व लोकस्य हिते निविष्टम्

5. Translation/anuvadah of one shloka. (One shloka should be given here from Kritaghne nasti nishkritihj

    - समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते । स एव दुर्गं तरति जलस्थो वानरो यथा ।
    - प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः ।वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसङ्क्रमः ।।
    - एकं प्रसूयते माता द्वितीया वाक्प्रसूयते ।वाग्जातमधिकं प्रोचुः सोदर्यादपि बन्धुवत् ।।राघवः
    - ब्रह्मगने च सुरापे च चौरे भग्नव्रते शठे ।निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ।।
    - ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति । भुङ्क्ते भोजयते चैव षड्खिधं प्रीतिलक्षणम् ।।
    - न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति

6. Disjoining the words as per the sandhi. (Five words should be given here from the Sandhis Refer text book for reference स्वर  संधि–अच्  संधि ; व्यंजन  संधि  –  हल्  संधि ;विसर्ग  संधि

7.Translation/anuvadah of one shloka. (One shloka should be given here from Kritaghne nasti nishkritihj


- समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते । स एव दुर्गं तरति जलस्थो वानरो यथा ।
- प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः ।वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसङ्क्रमः ।।

- एकं प्रसूयते माता द्वितीया वाक्प्रसूयते ।वाग्जातमधिकं प्रोचुः सोदर्यादपि बन्धुवत् ।।राघवः
- ब्रह्मगने च सुरापे च चौरे भग्नव्रते शठे ।निष्कृतिर्विहिता सद्धिः कृतघ्ने नास्ति निष्कृतिः ।।
- ददाति प्रतिगृह्णाति गुह्ममाख्याति पृच्छति । भुङ्क्ते भोजयते चैव षङ्खिधं प्रीतिलक्षणम् ।।
- न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति

8.Writing of a sholka/shiokapuranam. (The beginning and ending word of a shloka should be given here from first EIGHT shlokas of Esha dharma sanatanah)

- उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः । नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।
- अमन्त्रम् अक्षरं नास्ति नास्ति मूलम् अनौषधम् । अयोग्यः पुरुषो नास्ति योजकः तत्र दुर्लभः ।।
- गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा । अथवा विद्यया विद्या चतुर्थी नोपलम्यते ।।
- तत्र मित्र न वस्तव्यम् यत्र नास्ति चतुष्टयम् । ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ।।
- मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् । मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् ।।
- योजनानां सहस्रं तु शनैः गच्छेत् पिपीलिका । अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।
- काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।
- शकटं पञ्चहस्तेषु दशहस्तेषु वाजिनम् । गजं हस्तसहस्रेषु दुष्टं दूरेण ।।

Part-B

Answer all questions. All questions carry equal marks. 5X10=50

9. Explain one of the following with word to word meaning , translation with kavi parichayam (two shlokas should be give from first 20 shlokas of Himalayo nama nagadhirajah)

- अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः । पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।
- यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे । भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ।।
- अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् । एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।।
- आमेखलं सञ्चरतां घनानां च्छायामधः सानुगतां निषेव्य । उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥
- पदं तुषारसुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् । विदन्ति मार्ग नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ॥
- न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः । व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ।।
- यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन । उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ।।
- कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् । यत्र सुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ।।
- वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः । भवन्ति यत्रौषधयो रजन्यामतैलपूराः
- दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ।।
- लाङ्गुलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः । यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति वालव्यजनैश्चमर्यः ।।

10. Write an essay on any one of the following. (Two essay type questions one from each le unit II are to be given here)

- विष्णुशर्मणः पञ्चतन्त्रस्य परिचयं कुरुत ।
- "कृतघ्ने नास्ति निष्कृतिः" इति पाठ्यांशस्य सारं विवृणुत।
- वानरमकरयोः कथां पञ्चतन्त्रमनुसृत्य वर्णयत ।
- करालमुखस्य विश्वासघातकात् प्रयत्नात् रक्तमुखः कथं स्वं रक्षितुं यतितवान् ? विवृणुत ।
- पञ्चतन्त्रमनुसृत्य रक्तमुख - करालमुखयोः कथां संक्षेपेण लिखत ।
- शिवराजविजयरचयितुः परिचयं प्रस्तुवत ।
- धर्मबद्धो दौवारिक इति पाठ्यांशस्य सारं लिखत ।
- धर्मबद्धो दौवारिक इति पाठ्यांशे दौवारिकस्य स्वामिभक्तिम् उल्लिखत ।
- धर्मबद्धो दौवारिक इति पाठ्यांशे गौरसिंहस्य पात्रं विवृणुत ।

11. Decline fully any two of the following. (Four declensions should be given here from the text book

Refer text book

12. Join any five words and write the name of the sandhi. (Ten words are to be given he Sandhis)

Refer text book

13.. संस्कृतसम्भाषणाभ्यासः अनघा बतुवा translation (first half and second part of conversation to be given)

अनघा – सुप्रभातम् वसुधे, त्वं कथमसि ?
वसुधा – अनघे सप्रभातम्, सम्यक् अस्मि ।
वसुधा – अनघे! अपि गृहे सर्वं कुशलम् ?
अनघा – धन्यवादः, सर्वं कुशलम् ।
वसुधा – किम् अद्य प्रातः एव अत्र आगता, को विशेषः ?
अनघा – वसुधे, त्वम् अद्य विद्यालयं गच्छसि वा ?
वसुधा – गमिष्यामि अवश्यम्, किन्तु किमर्थं पृच्छसि? अवकाशः उद्घोषितः वा?
अनघा – न हि न हि, न जानाम्यहम् । सुवर्चला "अद्य अवकाशः स्यात्" इति संदेहेन वदति स्म ।
वसुधा – हा, अद्य भारतस्य मानवविकासमन्त्री अस्माकं विद्यालयं प्रति आगमिष्यति। किन्तु अवकाशः न उद्घोषितः ।
अनघा – सः महोदयः किमर्थम् आयाति ?
वसुधा – रसायनशास्त्रविभागस्य प्रयोगशालयाः उद्घाटनार्थम् ।
अनघा – तथा वा ?
वसुधा – न केवलं तत्, सः महोदयः तदनन्तरं विद्यालयस्य 'शतानन्दसभागारम्' प्रति आयास्यति ।
अनघा – 'शतानन्दसभागारे' किम् अस्ति ?
वसुधा – अनघे! कति वा प्रश्नान् पृच्छसि त्वम्? तत्र सः महानुभावः "भगवद्गीतायाम् मानवताविकासः" इति अंशम् उद्दिश्य अस्मान् सर्वान् उद्बोधयति।
अनघा – तथा वा? तर्हि . . .
वसुधा – मा पृच्छतु मातः! समयः अत्यल्पः अस्ति, शीघ्रं गन्तव्यम्। त्वमपि गृहं गत्वा झटिति तत्र आगच्छतु।